# वातापिगणपतिं भजेऽहम्

## रागम्: हंसध्वनि     ताळम्: आदि

**पल्लवि**

वातापिगणपातिं भजेऽहम्
वारणास्यं वरप्रदम् श्री

**अनुपल्लवि**

भूतादिसंसेवितचरणं
भूतभौतिकप्रपंचभरणम्
वीतरागिणं विनतयोगिनं
विश्वकारणं विघ्नवारणम्

**चरणम्**

पुरा कुम्भसंभवमुनिवर
प्रपूजितं त्रिकोणमध्यगतम्
मुरारिप्रमुखादुपासितं
मूलाधारक्षेत्रस्थितम्
परादिचत्वारिवागात्मकं
प्रणवस्वरूपवक्रतुण्डम्
निरन्तरं निटिलचन्द्रखण्डं
निजवामकरविधृतेक्षुदण्डम्
कराम्बुजपाशबीजापूरं
कलुषविदूरं भूताकारम्
हरादिगुरुगुहतोषितबिम्बं
हंसध्वनिभूषितहेरम्बम्

◇ ◇ ◇ ◇ ◇